# shrIrAmAnujaprapattiH

# શ્રીરામાનુજપ્રપત્તિઃ

## Document Information


Text title : rAmAnujaprapattiH

File name : rAmAnujaprapattiH.itx

Category : deities_misc, gurudev, rAmAnujasampradAya, prapatti

Location : doc_deities_misc

Proofread by : PSA Easwaran psawaswaran

Acknowledge-Permission: Shri Tripursundari Ved Gurukulam, Sahibabad (Ghaziabad), UP

Latest update : March 24, 2018

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીરામાનુજપ્રપત્તિઃ

તત્ત્વાવબોધમિહિરાભ્યુદયસ્ય પૂર્વં
સન્ધ્યાયિતૈદરવિનિદ્રસરોજરમ્યૈઃ ।
આપાટલાંશુપટલૈઃ પરિરભ્યમાણૌ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧॥

ભોગાપવર્ગરસિકૈઃપુરુષૈઃપ્રયુક્ત-
ન્યાસાઙ્ગપઞ્ચકયુગીમતિદાયિનીભિઃ ।
દીર્ઘાઙ્ગુલીભિરતુલૌ દશભિઃસુશોભૌ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૨॥

વેદાન્તદેશિકશિખાભરણાયમાનૌ
તસ્યાચ્છમાનસસરોવરરાજહંસૌ ।
તત્પ્રૌઢવાક્સુરનદીકમઠાયમાનૌ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૩॥

નિર્વાપિતપ્રચુરગર્વવિનમ્રસર્વ-
દુર્વાદિશીર્ષપરિષદ્બહુમાનિતાભ્યામ્ ।
વાદાહવેષુ ઘટિતૌ વરપાદુકાભ્યાં
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૪॥

ઉત્થાય યોગસુખતો મીતપ્રભાતે
સહ્યાદ્રિજાપ્લવવિધૌ ભૃશમુત્સુકસ્ય ।
ચિત્તસ્ય શીઘ્રગમનેન વિતીર્ણસાહ્યૌ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૫॥

રેખાધ્વજાઙ્કુશસરોરુહશઙ્ખમુખ્ય
ચિહ્નૈર્નિજૈસ્તત ઇતો મૃદુચઙ્ક્રમેણ ।
સહ્યાત્મજાપુલિનસીમનિ ભૂષયન્તૌ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૬॥

નિર્વર્ત્તને સતિ ચ સાન્ધ્યવિધેર્યથાવ-
દ્ભક્ત્યા મુહુઃપ્રણમતાં મહતાં જનાનામ્ ।
દ્રાગર્ચિતો સુવિહિતાઞ્જલિપદ્મકોશૈઃ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૭॥

શ્રીરઙ્ગનાથચરણાવિવ વેદમૌલિ-
ષ્વાત્મીયવૈભવવિદાં મહતાં દ્વિજાનામ્ ।
ધન્યોત્તમાઙ્ગવલભીષુ વિહારભાજૌ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૮॥

રઙ્ગાધિરાજસદનાભિમુખં પ્રયાન્તૌ
રથ્યાપરાગપટલીં નિજસઙ્ગભૂમ્ના ।
સંસારરોગશમનૌષધચૂર્ણયન્તૌ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૯॥

પ્રાબોધિકસ્તુતિવરેણ વિધૂતનિદ્રઃ
સ્નેહાર્દ્રયા નિજદૃશા પુરુષઃ પુરાણઃ ।
યૌ સિઞ્ચતિ સ્મ સપદિ ક્રમશો મુખાદ્યઃ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧૦॥

વેદાન્તગહ્વરનિલીનમનોહરાર્થ-
વ્યાખ્યારસૈકમનસો નિજશિષ્યવર્ગે ।
નિષ્પન્દતામુપગતૌ શ્રવણેચ્છયૈવ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧૧॥

ભિક્ષાટનસ્ય સમયે દિનયૌવનેઽપિ
તેજોઽનલેન્ધનમહં ન ભવેયમસ્ય ।
ઇત્થં ધરા ધૃતવતી શિશિરાસતી યૌ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧૨॥

શ્રીશેષશૈલકરિભૂધરયાદવાદ્રિ-
સિંહાચલેન્દ્રબદરીવનનાયકાનામ્ ।
નિત્યં ગતાગતજુષૌ પદસેવનાય
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧૩॥

સ્નાનેન પાતકિજનૈઃ પરિમુક્તસક્ત-

દોષાપનોદનકૃતે સુરનિમ્નગાયાઃ ।
તીરે નખદ્યુતિભિરાદધતાવિવાન્યાં
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧૪॥

શ્રીરામસેતુપરિકર્મવતામહોર્મિ-
જાલેન સિન્ધુસવિધે કલહાયમાનૌ ।
શ્રીપાદુકાસ્વનમિષાદ્વૃજિનાપનોદે
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧૫॥

રામાનુજપ્રપત્તિં યે તત્પદામ્ભોજભક્તિતઃ ।
પઠન્ત્યનુદિનં પ્રાતર્મુક્તિસ્તેષાં કરે સ્થિતા ॥ ૧૬॥

ઇતિ શ્રીરામાનુજપ્રપત્તિઃ ॥

Proofread by PSA Easwaran

*shrIrAmAnujaprapattiH*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*